# Ganesha Stuti by Prakriti and Purusha

# गणेशस्तुतिः प्रकृतिपुरुषयोः

## Document Information

Text title : Ganesha Stuti by Prakriti and Purusha

File name : gaNeshastutiHprakRRitipuruShayoH.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 6

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Ganesha Stuti by Prakriti and Purusha

# गणेशस्तुतिः प्रकृतिपुरुषयोः

श्रीगणेशाय नमः ।
प्रकृतिपुरुषावूचतुः ।
नमस्ते गणनाथाय स्वसंवेद्यमयाय ते ।
निराकारस्वरूपा वै शुण्डा यस्य विराजते ॥ ३१॥

यस्य देहश्च साकारः कण्ठाधः परिकथ्यते ।
अभेद एतयोर्जातस्तेन त्वं वै गजानन ॥ ३२॥

चतुर्विधं निजानन्दाद्वेदेषु कथितं भवेत् ।
एकमव्यक्तरूपं च द्वितीयं समरूपकम् ॥ ३३॥

तृतीय सत्स्वरूपं च चतुर्थं यत्सदा ह्यसत् ।
चतुर्हस्तस्वरूपं ते तेन त्वं वै चतुर्भुजः ॥ ३४॥

तवोदरे स्थितं सर्वं तेन लम्बोदरः स्मृतः ।
मायामायिकरूपं च द्वौ पादौ द्विविधं च ते ॥ ३५॥

एते सर्वे गणा ढुण्ढे त्वदीया नात्र संशयः ।
गणनाथोऽसि तेन त्वं नाम्ना ख्यातश्च सर्वदा ॥ ३६॥

एतादृशो निजात्मासावावयोर्ध्यान आवभौ ।
स्वसंवेद्यतया ध्यातो भक्तानुग्रहकारकः ॥ ३७॥

भक्ताभिमानभावेन देहधारी स्वयं ह्यभूत् ।
एतैश्च लक्षणैर्युक्तो गणेशो नामधारकः ॥ ३८॥

धन्यं सर्वं कृतं स्वामिन् येन त्वं देहवानभूः ।
स्वानन्दवासभृत साक्षाद् हृदि नित्यं स्थिरो भव ॥ ३९॥

नमस्ते विघ्नराजाय नमस्ते विघ्नहारिणे ।
भक्तानां वै ह्यभक्तानां विनकर्त्रे नमोऽस्तु ते ॥ ४०॥

कर्मणां फलदात्रे च ज्ञानानां सिद्धिदायिने ।
अमेयशक्तये तुभ्यं सर्वाधाराय ते नमः ॥ ४१॥

किं कर्तव्यं दयासिधो तदेवाज्ञापय प्रभो ।
तव भक्तिं महातीव्रां देहि नौ गणनायक ॥ ४२॥

एवं स्तुतिं समाकार्ण्य परितुष्टो गणाधिपः ।
मेघगम्भीरया वाचा हर्षयन्नब्रवीत्तदा ॥ ४३॥

श्रीगणेश उवाच ।
साधु साधु महाभागौ यदुक्तं स्तोत्रमुत्तमम् ।
मम प्रीतिकरं सर्वकामदं प्रभविष्यति ॥ ४४॥

धर्मार्थकाममोक्षाणां दायकं पुष्टिवर्धनम् ।
कारागृहस्थितानां च मोचकं लक्षपाठतः ॥ ४५॥

मारणोच्चाटनादीनां नाशकं तत्तथैव च ।
एकविंशतिवारं यः एकविंशद्दिनावधि ॥ ४६॥

पठेत्तु यदि वैभक्त्या स ईप्सितफलं लभेत् ।
ब्रह्मभूयकरं चैतन्निष्कामपठनाद्भवेत् ॥ ४७॥

भवतोस्तपसा तुष्टः स्तोत्रेणानेन भावतः ।
प्रीतो दास्यामि सम्पूर्णं भवद्भ्यामीप्सितं च यत् ॥ ४८॥

बिन्दुमात्रस्वरूपेण यत्स्थितं ब्रह्म शाश्वतम् ।
तस्माच्चतुर्विधं विश्वं प्रकटं सम्भविष्यति ॥ ४९॥

प्रकर्षेण च सर्वेषां कृतिस्तस्माद्विनिःसृता ।
प्रकृतिस्तेन ते नाम भविष्यति जनेष्विदम् ॥ ५०॥

सृष्ट्वा चतुर्विधं विश्वं बन्धहीना भविष्यसि ।
मदीयां भक्तिमचलां प्रकृते प्राप्स्यसि ध्रुवम् ॥ ५१॥

जनास्त्वदीयभक्तिं ये करिष्यन्ति सकामतः ।
निष्कामतश्च तेभ्यस्त्वं सर्वं दास्यसि शोभने ॥ ५२॥

चतुर्विधेप्ययं शेते पुरे तेनैव पूरुषः ।
सोऽहम्मात्रात्मको भावी नाना सर्वत्र तिष्ठतु ॥ ५३॥

सर्वाकारविहीनोऽयं तत्र भ्रान्तो भविष्यति ।

बिम्बबिम्बितभावेन प्रकृतौ मोहितः सदा ॥ ५४॥

स्वयं मोहविहीनः स सोऽहंमात्रात्मकः सदा ।
मत्प्रसादाद्भवेन्नित्यं ब्रह्म सोऽहं सुखात्मकः ॥ ५५॥

मदीया भक्तिरचला भविष्यति तवापि च ।
तया बन्धविहीनस्त्वं तथा मान्यो भविष्यसि ॥ ५६॥

तव भक्तिं करिष्यन्ति जना भावेन संयुताः ।
तेभ्यस्तदीप्सितं सर्वं दास्यसि त्वं न संशयः ॥ ५७॥

ब्रह्मभूयपदं चैव दास्यसे योगसेवया ।
साक्षात्पुरुषरूपस्त्वं सर्वसत्तात्मको भव ॥ ५८॥

प्रकृतौ वीर्यमाधत्स्व सर्वसत्तात्मकं विभो ।
तेनेयं सर्वसूर्विश्वं सृजिष्यति न संशयः ॥ ५९॥

सृष्ट्वा चतुर्विधं सर्वं पालनं हरणं तथा ।
कर्तव्यं कालयोगेन करणीयमिदं स्मृतम् ॥ ६०॥

सर्वेषां प्रकृतिर्माता पिता पुरुष उच्यते ।
नानारूपाणि नामानि कल्पयिष्यन्ति वै जनाः ॥ ६१॥

इत्युक्त्वा गणराजस्तु तत्रैवान्तरधीयत ।
प्रकृतिः पुरुषश्चैव यथाज्ञप्तौ प्रचक्रतुः ॥ ६२॥

इति प्रकृतिपुरुषयोः गणेशस्तुतिः । १.६

*Ganesha Stuti by Prakriti and Purusha*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*